# Vishnuproktam Shiva Stotram

# विष्णुप्रोक्तं शिवस्तोत्रम्

## Document Information

Text title : Vishnuproktam 8 Shiva Stotram

File name : viShNuproktaMshivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | shatarudrasaMhitA | adhyAya 9/34-40||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# विष्णुप्रोक्तं शिवस्तोत्रम्

विष्णुरुवाच ।
कृत्वापि सुमहत्पापं यस्त्वां स्मरति मानवः ।
आधारं जगतामीश तस्य पापं विलीयते ॥ ३४॥

यथा तमो न तिष्ठेत सन्निधावंशुमालिनः ।
तथैव तव यो भक्तः पापं तस्य व्रजेत्क्षयम् ॥ ३५॥

यश्चिन्तयति पुण्यात्मा तव पादाम्बुजद्वयम् ।
ब्रह्महत्याकृतमपि पापं तस्य व्रजेत्क्षयम् ॥ ३६॥

तव नामानुरक्ता वाग्यस्य पुंसो जगत्पते ।
अप्यद्रिकूटतुलितं नैनस्तमनुबाधते ॥ ३७॥

परमात्मन्परन्धाम स्वेच्छाभिधृतविग्रह ।
कुतूहलं तवेशेदं कृपणाधीनतेश्वर ॥ ३८॥

अद्य धन्योऽस्मि देवेश यत्र पश्यन्ति योगिनः ।
पश्यामि तं जगन्मूर्त्तिं परमेश्वरमव्ययम् ॥ ३९॥

अद्य मे परमो लाभस्त्वद्य मे मङ्गलं परम् ।
तं दृष्ट्वामृततृप्तस्य तृणं स्वर्गापवर्गकम् ॥ ९.४०॥

इत्थं वदति गोविन्दे विमला पद्मया तया ।
मनोरथवती नाम भिक्षा पात्रे समर्पिता ॥ ४१॥

भिक्षाटनाय देवोऽपि निरगात्परया मुदा ।
अन्यत्रापि महादेवो भैरवश्चात्तविग्रहः ॥ ४२॥

दृष्ट्वानुयायिनीं तान्तु समाहूय जनार्दनः ।
सम्प्रार्थयद्ब्रह्महत्यां विमुञ्च त्वं त्रिशूलिनम् ॥ ४३॥

इति शिवपुराणे शतरुद्रसंहितायां नवमाध्ययान्तर्गतं

विष्णुकृतं शिवस्तोत्रं समाप्तम् ।

शिवपुराण । शतरुद्रसंहिता । अध्याय ९/३४-४० ॥

shivapurANa . shatarudrasaMhitA . adhyAya 9/34-40..

Proofread by PSA Easwaran

---

*Vishnuproktam Shiva Stotram*

pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*